न तु पुत्रिकाया इति वाच्यं पुत्रिकाया अङ्गजत्वात् तदधीनजन्मतया च तत्पुत्रस्य पिण्डदानयोगात् तस्या एवोत्कर्षेण पुत्रत्वौचित्यात्। एतन्न्यायादेव अपुत्रिकाया अपि दुहितुरभाव एव दौहित्रस्यैव प्राप्ताधिकारोपपत्तिः। अतएव समस्तत्वेत्यनेन पुत्रिकौरसयोरेव समभागिता समुक्ता न तु तस्याः पुत्रस्य औरससमभागिता केनाप्युक्तेति। इत्थञ्च “पुत्रिकापुत्र एव चेति” द्वादशविधपुत्रगणनायां कर्मधारयो न तु तत्पुरुष इति विभावनीयम्। पूर्वोक्तविभाग इति समभाग इत्यर्थः”। अपत्यधनाधिकारे च दाय०भा० कश्चिद्विशेष उक्तो यथा “अतएव स्वपुत्रद्वारेण पिण्डदातृतया दुहितुः पितृधनाधिकारः अतएव पुत्रिकाया अपि पितुरपरमजातधनसम्बन्धायाः पश्चाद्वन्ध्यात्वेन तद्भर्त्तुर्वा प्रव्रज्यासामर्थ्येन विपर्य्यस्तपुत्रायाः मरणे तद्धनं न भर्तुः। यथा शङ्खलिखितौ “प्रेतायाः पुत्रिकायास्तु न भर्त्ता द्रव्यमर्हत्यपुत्रायाः”। तथा पैठीनसिः “प्रेतायां पुत्रिकायान्तु न भर्त्ता द्रव्यमर्हति। अपुत्रायां, कुमार्य्यां वा स्वस्रा ग्राह्यं तदन्यया”। ततः कुमार्य्यां स्वस्रा अन्यया वा पुत्रवत्या सम्भावितपुत्रया स्वस्रा तद्धनं ग्राह्यम्। अतः स्त्र्यधिकारे व्यावृत्तिरन्याधिकारस्य। यत्तु मनुवचनम् “अपुत्रायां मृतायान्तु पुत्रिकायां कथञ्चन। धनं तत् पुत्रिकाभर्त्ता हरेतैवाविचारयन्”। तदविपर्य्यस्तपुत्राया अनुत्पन्नस्तनपुत्रायाः पुत्रिकाया मरणे वेदितव्यम्” “विपर्य्यस्तपुत्रायाः पुत्रात्यन्ताभाववत्याः। तद्धनं ग्राह्यमिति। तदपि पत्यभावे कुमार्य्यादीनां पत्नीबाध्यत्वादिति बोध्यम्। अत इति उक्तोभयस्वत्वाभ्यां विपर्य्यस्तपुत्रायाः पुत्रिकायामरणे कुमार्य्यादीनामधिकारे प्राप्ते भर्तुरधिकारस्य व्यावृत्तिरिति समयोपसंहारः। प्राञ्चस्तु यतः पुत्रिकाया एव विपर्य्यपुत्रायामरणे न तत्संक्रान्तदाये भर्तुरधिकारोऽतः स्त्र्यधिकारे अन्यासां दुहित्रादीनामप्यधिकारेऽनन्तरं विपर्य्यस्तपुत्रायां तासां मरणे भर्तुरधिकारस्य व्यावृत्तिरिति व्याचक्रुः। तदविपर्य्यस्तपुत्राया इति। एतस्यैव विवरणम् अनुत्पन्नस्तनपुत्राया इति। अत्र पक्षान्तराभावात् चकारः क्वाचित्कः पाठः प्रामादिकः। यथात्र शङ्खलिखितादिवचनमेव उत्पन्नस्तनपुत्राविषयं मनुवचनन्तु अनुत्पन्नपुत्राविषयमिति वैपरीत्यमेव न कुतः? उत्पन्नपुत्राया, इवाविपर्य्यस्तपुत्रायाः पुत्रोत्पत्त्यैव पितुः पुन्नामनरकनिवर्त्तकत्वेन कृतोपकारकतया स्वामित्वे निर्व्यूढे पितुरितरापेक्षया तस्या एवाधिकोपकारित्वात् तद्भर्तुरधिकारो युक्तः अतएव “दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि” इत्यनेन दौहित्रमुखदर्शनस्यापि नरकनिस्तारकतेति। पुत्रानुत्पत्तौ तु पितुरुपकाराभावात् तस्या एव न स्वामित्वं कुतस्तत्पत्युरिति तत्पितृधनाधिकारिणां कन्यादीनामेव तदानीं तत्राधिकारस्य न्याय्यत्वात्। यद्यपि बन्ध्यात्वेनावधृतायां जीवन्त्यामप्येवमुचितं तथापि प्रेताया इति पदग्रहणात् न जीवन्त्यां तस्याम् अन्यदुहित्रादीनामधिकार इति” श्रीकृष्णव्याख्या।

**पुत्रिन्** पुंस्त्री पुत्र+अस्त्यर्थे इनि। पुत्रयुक्ते स्त्रियां ङीप्

**पुत्री** स्त्री पुत्र+गौरा० ङीष्। १कन्यायां २वृक्षभेदे हला०।

**पु(त्रीय)त्र्य** त्रि० पुत्रस्य निमित्तं संयोग उत्पातो वा “पुत्राच्छ च” पा० छ पक्षे यत्। १पुत्रनिमित्ते संयोगे २तदीयोत्पाते च। पुत्रस्येदम् छ। ३पुत्रसम्बन्धिनि त्रि०। “धन्यं यशस्यं पुत्रीयमायुष्यं विजयाय च” भा०आ० ६७अ०। ४इष्टिभेदे स्त्री रामा०अयो० १५।२

**पुत्रेष्टि** स्त्री पुत्रकाम कर्त्तव्या इष्टिः शा०त०। पुत्रकामकार्य्ये इष्टिभेदे सा च आश्व०श्रौ०२।१०।दत्तकादौ दृश्यः। “गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्” दत्तकमीमांसाधृतवाक्यम्। स्वार्थे क। तत्रार्थे जटाध०।

**पुत्रैषणा** स्त्री ६त०। पुत्रेच्छायां शत०ब्रा० १४।६।१४।१

**पुथ** हिंसे दि०पर०सक०सेट्। पुथ्यति अपोथीत्। पुपोथ।

**पुन्थ** वधे सक० क्लेशे अक०भ्वा०पर०सेट् इदित्। पुन्थति अपुन्थीत् पुपुन्थ पुन्थ्यते।

**पुथ** दीप्तौ चु०उभ०सक० सेट्। पोथयति-ते अपूपुथत्-त।

**पुद्गल** पु० पूरणात् पुत् गलतीति गलः कर्म०। १परमाणौ “पूरणाद्गलनात् देहे पुद्गलाः परमाणवः” इति विष्णुपु० टीकायां श्रीधरधृतवाक्यम्। २बौद्धमतप्रसिद्धे अणुकादिपदार्थभेदे च। पुत् कुत्सितो गलो यस्मात्। ३सुन्दराकारे त्रि०शब्दर०। ४रूपादिविशिष्टे त्रि०हेमच०[आत्मनि अमरः।

**पुनःपुनर्** अव्य०पुनर्+वीप्सायां द्वित्वम्। १मुहुरित्यर्थे २अ-

**पुनःपुना** स्त्री पु० पुनः पुनाति पू—नक् पृषो०। नदीभेदे “कीकटेषु गया पुण्या नदी पुण्या पुनःपुना” वायुपु०।

**पुनःसंस्कार** पु० पुनर्वारः संस्कारः। १द्वितीयोपनयनसंस्कारे गोमांसादिभक्षणे प्रायश्चित्तनिमित्ते पुनर्वारोपनयनभेदे “पुनर्वसौ द्वातो विप्रः पुनःसंस्कारमर्हति” इत्युक्ते उपनयने ज्यो०त० “अज्ञानात् प्राश्य विण्मूत्रं सुरासं-